Homas
the spiritual way to success

K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ सन्तानयागप्रसङ्गात् वन्ध्यात्वनिवृत्तिप्रदः कल्पोऽप्यत्र लिख्यते—

वन्ध्यात्वयं समुद्दिष्टं महापातकसंज्ञिकम् ।
काकं चाकाकमित्येव वन्धनं च तथोच्यते ॥

गर्भंप्राथमिकादूर्ध्वं यावदायुष्मती भवेत् ।
तावत्तस्यास्तु गर्भं वै न काकं त्वभिधीयते ॥

प्रतिगर्भं विनाशं वा प्रतिपुत्रमथापि वा ।
यस्यां तु जायते काकमित्यभिज्ञाः प्रचक्षते ॥

कदाचिदपि यस्यां तु गर्भशङ्को न विद्यते ।
तद्बन्धनमिति प्रोक्तं पूर्वजन्मकृताघजम् ॥

पूर्वजन्मान्तरे विष्णोः पूजकानां महात्मनाम् ।
कार्पण्यभाषिणी या तु काकवन्ध्या प्रजायते ॥

या तु पूर्वभवे स्तन्यं पातुकामान् शिशून्प्रति ।
विघ्नमाचरती बन्धून् सा काकं प्रतिपद्यते ॥

निकृतिं जो(जु)षमाणा या स्वपतिं प्रति पूर्वके ।
जन्मान्तरे सा तु याति बन्धनं त्वघसंभवम् ॥

तस्मात्सर्वप्रयत्नेन शान्तिं कुर्याद्विचक्षणः ।
यथा कर्मविपाकोत्थदोषो नश्यत्यशेषतः ॥

यथाशक्त्यनुसारेण वित्तशाठ्यं परित्यजन् ।
दया (श्रद्धा) भक्त्यन्वितः कुर्याच्छान्तिं सर्वाघशान्तये ॥

यथाविधि यथाकल्पं मान्त्रिकेण भवेत् (कृतं) यदि ।
सद्यश्शान्तिमवाप्नोति सन्तानं च भविष्यति ॥

कुम्भे कर्कटके चैव कन्यामिथुनवर्जिते ।
वृश्चिके चापफाल्गुन्योराचार्यः शान्तिमाचरेत् ॥

शुक्रादिशुभवारेषु पुष्ययोगर्क्षशुक्लि(क्ल)के ।
मैत्रे परममैत्रे च क्षेमसंपत्स्वसाधके ॥

सङ्कल्पपूर्वकेणाथ समस्तद्रव्यसञ्चयैः ।
रक्षाबन्धनहोमादिशान्तिं कुर्यात् सह द्विजैः ॥

आदौ तु पञ्चगव्यानां प्राशनं पक्षमात्रकम् ।
पश्चादौषधसंयुक्तं गोघृतं प्राशयेत्सुधीः ॥

षण्मासं वा त्रिमासं वा मण्डलान्तमथापि वा ।
दम्पती मन्त्रपूर्वं तु शीघ्रसिद्धिप्रदाय वै ॥

शुचौ देशे त्वथाचार्यो दम्पतीभ्यां सह द्विजैः ।
लौकिकाग्निं प्रतिष्ठाप्य स्वगृह्योक्तविधानतः ॥

मुखान्तं जुहुयात्पश्चादाहुतीभिश्चतुर्दशैः ।
यमाय चित्रगुप्तायेत्यन्तैराज्येन होमयेत् ॥

पश्चादर्कसमिद्भिश्च गायत्र्याऽष्टसहस्रकम् ।
हुत्वाऽथ रुद्रगायत्र्या पायसेन सहस्रकम् ॥

प्रत्यृचं घृतसक्तेन जुहुयात्तु सहस्रकम् ।
आज्येनातः परं माषैर्विष्णुगायत्रिया हुनेत् ॥

तिलैरष्टसहस्रं तु त्र्यम्बकेन हुनेत्ततः ।
सक्तुनाऽष्टसहस्रं वै तस्या नक्षत्रवाक्यतः ॥

आचार्यः पञ्चचूर्णेन अष्टोत्तरसहस्रकम् ।
स्वेष्टदैवतमन्त्रेण हुनेत्सन्तानवृद्धये ॥

सर्षपाशमताकेन संयुतं सार्द्रमेव च ।
शुण्ठी पिप्पलि मारीचं चूर्णं पञ्चेति संज्ञिकम् ॥

तिन्त्रिणीबीजमात्रेण चूर्णहोम इतीर्यते ।
जयादिपरिषेचान्तमुपस्थानं विधाय च ॥

ततोग्नेरुत्तरे भागे कुम्भस्थापनमाचरेत् ।
द्रोणप्रमाणं धान्यं तु तदर्धं तण्डुलं तथा ॥

तदर्धं तु तिलं तत्र उपर्युपरि निक्षिपेत् ।
तन्मध्येऽष्टदलं लिख्य पद्मं तारेण वेष्टयेत् ॥

तस्मिन् कुम्भं निधायाथ सर्वालङ्कारशोभितम् ।
तिरःपवित्रमादाय जलेनापूर्य मन्त्रतः ॥

द्वादशारत्निमात्रेण वस्त्रेणावेष्ट्य तत्र वै ।
नवरत्नानि निक्षिप्य नारिकेळफलादिभिः ॥

अलंकृत्य ततः कुम्भमावाह्य वरुणं ततः ।
वारुणेनैव मन्त्रेण उपचारांस्तु षोडश ॥

कृत्वा पश्चान्महायन्त्रं कुम्भस्यैशान्यदिक्तटे ।
स्थापयेद्रक्तवस्त्रे तु यथावन्निर्मितं कृधि ॥

उत्तमं राजतं स्वर्णं मध्यमं पाञ्चधातुकम् ।
अधमं सीसं ताम्रं चेत्याहुर्मन्त्रविदां वराः ॥

मध्यमानामिकातर्जमात्रया पद्ममाचरेत् ।
विशेषेण तु पत्न्या वा दक्षिणस्य करस्य हि ॥

अथाचरणमन्त्रस्य आचार्यो यन्त्रमालिखेत् ।
यन्त्रप्राणप्रतिष्ठां च कृत्वाऽऽवाह्यास्य दैवतम् ॥

पूजयित्वोपचारैस्तु षोडशैरिष्टदेवताम् ।
एतद्यन्त्रं प्रतिष्ठाप्य कुम्भस्यैशान्य आसने ॥

आभिमुख्येन चाचार्यो दम्पतीभ्यां सह द्विजैः ।
स्पृष्ट्वा कुम्भं जपेन्मन्त्रं पूर्वं होमार्थमुद्यतान् ॥

प्रत्येकमष्टसाहस्रं प्रतिमन्त्रं जपेद्बुधः ।
पश्चात् प्रतिसरं मन्त्रं श्रीरुद्रं चमकं पुनः ॥

जपित्वैकादशं वारं पञ्चशान्तिमतः परम् ।
राक्षोघ्नं पौरुषं सूक्तं श्रीसूक्तं घृतसूक्तकम् ॥

*नमो ब्रह्मेति मन्त्रेण त्रिरुत्थाप्य घटं पुनः ।
वरुणोद्वासनं कृत्वा प्रोक्ष्य चाब्लिङ्गमन्त्रतः ॥

सह द्विजैस्सहर्त्विग्भिरभिषिञ्चेत्समाहितः ।
अग्ने रक्षाण इति च रक्षाबन्धनमाचरेत् ॥

बध्वा रक्षामथाचार्यो रक्ष माचल माचल ।
इति मन्त्रं जपेत्स्पृष्ट्वा रक्षामिष्टार्थसिद्धये ॥

यजमानस्त्वथर्त्विग्भ्यो यथाशक्त्यनुसारतः ।
दद्याद्वै दक्षिणां भक्त्या वित्तशाठ्यं परित्यजन् ॥

आचार्याय ततो दद्यात् कुम्भवस्त्रादिदक्षिणाम् ।
ब्राह्मणान् भोजयेत्पश्चात् चतुर्दश समाहितः ॥

अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ।
विभवे सति विप्राणां भोजयित्वाथवार्चयेत् ॥

इत्थं कृते पुत्रवती भवेच्च चित्रापि (वन्ध्यापि) पुष्पत्रयमात्ततो वा ।
तस्माद्विधिज्ञैस्सहसैव कुर्यात्पुत्राभिलाषी तु पुमान्बुधश्चेत् ॥

अथ सन्तानप्रकरणप्रसङ्गात् रेणुकाकल्पोक्तप्रकारेणापि तत्प्रकारो लिख्यते—

भार्गव ऋषिः । पङ्क्तिः छन्दः । रेणुका देवता । क्लीं बीजम् । स्वाहा शक्तिः । क्लां हृत् । क्लीं शिरः । इत्याद्यङ्गानि । ध्यानम्—

---

*ओं नमो ब्रह्मणे चेति त्रिर्जहत्तोद्वास्य वै घटात् । देवतां वरुणं चाथ इति पाठः शोधनीयो भाति ।